# Akrurakritam 4 Shri Krishna Stotram

# અક્રૂરકૃતં ૪ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Akrurakritam 4 Shri Krishna Stotram

File name : akrUrakRRitaMshrIkRRiShNastotram4.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/40/1-30||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2025

*sanskritdocuments.org*

# અક્રૂરકૃતં ૪ શ્રીકૃષ્ણસ્તોત્રમ્

અક્રૂર ઉવાચ ।
નતોઽસ્મ્યહં ત્વાખિલહેતુહેતું
નારાયણં પૂરુષમાદ્યમવ્યયમ્ ।
યન્નાભિજાતાદરવિન્દકોશા-
દ્બ્રહ્માઽઽવિરાસીદ્યત એષ લોકઃ ॥ ૧॥

ભૂસ્તોયમગ્નિઃ પવનઃ ખમાદિ-
ર્મહાનજાદિર્મન ઇન્દ્રિયાણિ ।
સર્વેન્દ્રિયાર્થા વિબુધાશ્ચ સર્વે
યે હેતવસ્તે જગતોઽઙ્ગ ભૂતાઃ ॥ ૨॥

નૈતે સ્વરૂપં વિદુરાત્મનસ્તે
હ્યજાદયોઽનાત્મતયા ગૃહીતાઃ ।
અજોઽનુબદ્ધઃ સ ગુણૈરજાયા
ગુણાત્પરં વેદ ન તે સ્વરૂપમ્ ॥ ૩॥

ત્વાં યોગિનો યજન્ત્યદ્ધા મહાપુરુષમીશ્વરમ્ ।
સાધ્યાત્મં સાધિભૂતં ચ સાધિદૈવં ચ સાધવઃ ॥ ૪॥

ત્રય્યા ચ વિદ્યયા કેચિત્ત્વાં વૈ વૈતાનિકા દ્વિજાઃ ।
યજન્તે વિતતૈર્યજ્ઞૈર્નાનારૂપામરાખ્યયા ॥ ૫॥

એકે ત્વાખિલકર્માણિ સન્ન્યસ્યોપશમં ગતાઃ ।
જ્ઞાનિનો જ્ઞાનયજ્ઞેન યજન્તિ જ્ઞાનવિગ્રહમ્ ॥ ૬॥

અન્યે ચ સંસ્કૃતાત્માનો વિધિનાભિહિતેન તે ।
યજન્તિ ત્વન્મયાસ્ત્વાં વૈ બહુમૂર્ત્યેકમૂર્તિકમ્ ॥ ૭॥

ત્વામેવાન્યે શિવોક્તેન માર્ગેણ શિવરૂપિણમ્ ।
બહ્વાચાર્યવિભેદેન ભગવન્ સમુપાસતે ॥ ૮॥

સર્વ એવ યજન્તિ ત્વાં સર્વદેવમયેશ્વરમ્ ।
યેઽપ્યન્યદેવતાભક્તા યદ્યપ્યન્યધિયઃ પ્રભો ॥ ૯॥

યથાદ્રિપ્રભવા નદ્યઃ પર્જન્યાપૂરિતાઃ પ્રભો ।
વિશન્તિ સર્વતઃ સિન્ધું તદ્વત્ત્વાં ગતયોઽન્તતઃ ॥ ૧૦॥

સત્ત્વં રજસ્તમ ઇતિ ભવતઃ પ્રકૃતેર્ગુણાઃ ।
તેષુ હિ પ્રાકૃતાઃ પ્રોતા આબ્રહ્મસ્થાવરાદયઃ ॥ ૧૧॥

તુભ્યં નમસ્તેઽસ્ત્વવિષક્તદૃષ્ટયે
સર્વાત્મને સર્વધિયાં ચ સાક્ષિણે ।
ગુણપ્રવાહોઽયમવિદ્યયા કૃતઃ
પ્રવર્તતે દેવનૃતિર્યગાત્મસુ ॥ ૧૨॥

અગ્નિર્મુખં તેઽવનિરઙ્ઘ્રિરીક્ષણં
સૂર્યો નભો નાભિરથો દિશઃ શ્રુતિઃ ।
દ્યૌઃ કં સુરેન્દ્રાસ્તવ બાહવોઽર્ણવાઃ
કુક્ષિર્મરુત્પ્રાણબલં પ્રકલ્પિતમ્ ॥ ૧૩॥

રોમાણિ વૃક્ષૌષધયઃ શિરોરુહા
મેઘાઃ પરસ્યાસ્થિ નખાનિ તેઽદ્રયઃ ।
નિમેષણં રાત્ર્યહની પ્રજાપતિ-
ર્મેઢ્રસ્તુ વૃષ્ટિસ્તવ વીર્યમિષ્યતે ॥ ૧૪॥

ત્વય્યવ્યયાત્મન્ પુરુષે પ્રકલ્પિતા
લોકાઃ સપાલા બહુજીવસઙ્કુલાઃ ।
યથા જલે સઞ્જિહતે જલૌકસો-
અપ્યુદુમ્બરે વા મશકા મનોમયે ॥ ૧૫॥

યાનિ યાનીહ રૂપાણિ ક્રીડનાર્થં બિભર્ષિ હિ ।
તૈરામૃષ્ટશુચો લોકા મુદા ગાયન્તિ તે યશઃ ॥ ૧૬॥

નમઃ કારણમત્સ્યાય પ્રલયાબ્ધિચરાય ચ ।
હયશીર્ષ્ણે નમસ્તુભ્યં મધુકૈટભમૃત્યવે ॥ ૧૭॥

અકૂપારાય બૃહતે નમો મન્દરધારિણે ।
ક્ષિત્યુદ્ધારવિહારાય નમઃ સૂકરમૂર્તયે ॥ ૧૮॥

નમસ્તેઽદ્ભુતસિંહાય સાધુલોકભયાપહ ।

વામનાય નમસ્તુભ્યં ક્રાન્તત્રિભુવનાય ચ ॥ ૧૯॥

નમો ભૃગુણાં પતયે દૃપ્તક્ષત્રવનચ્છિદે ।
નમસ્તે રઘુવર્યાય રાવણાન્તકરાય ચ ॥ ૨૦॥

નમસ્તે વાસુદેવાય નમઃ સઙ્કર્ષણાય ચ ।
પ્રદ્યુમ્નાયાનિરુદ્ધાય સાત્ત્વતાં પતયે નમઃ ॥ ૨૧॥

નમો બુદ્ધાય શુદ્ધાય દૈત્યદાનવમોહિને ।
મ્લેચ્છપ્રાયક્ષત્રહન્ત્રે નમસ્તે કલ્કિરૂપિણે ॥ ૨૨॥

ભગવન્ જીવલોકોઽયં મોહિતસ્તવ માયયા ।
અહમ્મમેત્યસદ્ગ્રાહો ભ્રામ્યતે કર્મવર્ત્મસુ ॥ ૨૩॥

અહં ચાત્માઽઽત્મજાગારદારાર્થસ્વજનાદિષુ ।
ભ્રમામિ સ્વપ્નકલ્પેષુ મૂઢઃ સત્યધિયા વિભો ॥ ૨૪॥

અનિત્યાનાત્મદુઃખેષુ વિપર્યયમતિર્હ્યહમ્ ।
દ્વન્દ્વારામસ્તમોવિષ્ટો ન જાને ત્વાત્મનઃ પ્રિયમ્ ॥ ૨૫॥

યથાબુધો જલં હિત્વા પ્રતિચ્છન્નં તદુદ્ભવૈઃ ।
અભ્યેતિ મૃગતૃષ્ણાં વૈ તદ્વત્ત્વાહં પરાઙ્મુખઃ ॥ ૨૬॥

નોત્સહેઽહં કૃપણધીઃ કામકર્મહતં મનઃ ।
રોદ્ધું પ્રમાથિભિશ્ચાક્ષૈર્હ્રિયમાણમિતસ્તતઃ ॥ ૨૭॥

સોઽહં તવાઙ્ઘ્ર્યુપગતોઽસ્મ્યસતાં દુરાપં
તચ્ચાપ્યહં ભવદનુગ્રહ ઈશ મન્યે ।
પુંસો ભવેદ્યર્હિ સંસરણાપવર્ગ-
સ્ત્વય્યબ્જનાભ સદુપાસનયા મતિઃ સ્યાત્ ॥ ૨૮॥

નમો વિજ્ઞાનમાત્રાય સર્વપ્રત્યયહેતવે ।
પુરુષેશપ્રધાનાય બ્રહ્મણેઽનન્તશક્તયે ॥ ૨૯॥

નમસ્તે વાસુદેવાય સર્વભૂતક્ષયાય ચ ।
હૃષીકેશ નમસ્તુભ્યં પ્રપન્નં પાહિ માં પ્રભો ॥ ૩૦॥

યુવાં પ્રધાનપુરુષૌ જગદ્ધેતૂ જગન્મયૌ ।
ભવદ્ભ્યાં ન વિના કિઞ્ચિત્પરમસ્તિ ન ચાપરમ્ ॥ ૧૮॥

આત્મસૃષ્ટમિદં વિશ્વમન્વાવિશ્ય સ્વશક્તિભિઃ ।

ઈયતે બહુધા બ્રહ્મન્ શ્રુતપ્રત્યક્ષગોચરમ્ ॥ ૧૯॥

યથા હિ ભૂતેષુ ચરાચરેષુ
મહ્યાદયો યોનિષુ ભાન્તિ નાના ।
એવં ભવાન્ કેવલ આત્મયોનિ-
ષ્વાત્માऽऽત્મતન્ત્રો બહુધા વિભાતિ ॥ ૨૦॥

સૃજસ્યથો લુમ્પસિ પાસિ વિશ્વં
રજસ્તમઃસત્ત્વગુણૈઃ સ્વશક્તિભિઃ ।
ન બધ્યસે તદ્ગુણકર્મભિર્વા
જ્ઞાનાત્મનસ્તે ક્વ ચ બન્ધહેતુઃ ॥ ૨૧॥

દેહાદ્યુપાધેરનિરૂપિતત્વા-
દ્ભવો ન સાક્ષાન્ન ભિદાऽऽત્મનઃ સ્યાત્ ।
અતો ન બન્ધસ્તવ નૈવ મોક્ષઃ
સ્યાતાં નિકામસ્ત્વયિ નોઽવિવેકઃ ॥ ૨૨॥

ત્વયોદિતોઽયં જગતો હિતાય
યદા યદા વેદપથઃ પુરાણઃ ।
બાધ્યેત પાખણ્ડપથૈરસદ્ભિ-
સ્તદા ભવાન્ સત્ત્વગુણં બિભર્તિ ॥ ૨૩॥

સ ત્વં પ્રભોઽદ્ય વસુદેવગૃહેઽવતીર્ણઃ
સ્વાંશેન ભારમપનેતુમિહાસિ ભૂમેઃ ।
અક્ષૌહિણીશતવધેન સુરેતરાંશ-
રાજ્ઞામમુષ્ય ચ કુલસ્ય યશો વિતન્વન્ ॥ ૨૪॥

અદ્યેશ નો વસતયઃ ખલુ ભૂરિભાગા
યઃ સર્વદેવપિતૃભૂતનૃદેવમૂર્તિઃ ।
યત્પાદશૌચસલિલં ત્રિજગત્પુનાતિ
સ ત્વં જગદ્ગુરુરધોક્ષજ યાઃ પ્રવિષ્ટઃ ॥ ૨૫॥

કઃ પણ્ડિતસ્ત્વદપરં શરણં સમીયાત્
ભક્તપ્રિયાદૃતગિરઃ સુહૃદઃ કૃતજ્ઞાત્ ।
સર્વાન્ દદાતિ સુહૃદો ભજતોઽભિકામા-
નાત્માનમપ્યુપચયાપચયૌ ન યસ્ય ॥ ૨૬॥

દિષ્ટ્યા જનાર્દન ભવાનિહ નઃ પ્રતીતો
યોગેશ્વરૈરપિ દુરાપગતિઃ સુરેશૈઃ ।
છિન્ધ્યાશુ નઃ સુતકલત્રધનાપ્તગેહ-
દેહાદિમોહરશનાં ભવદીયમાયામ્ ॥ ૨૭॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે પૂર્વાર્ધે ચત્વારિંશાધ્યાયાન્તર્ગતં
અક્રૂરકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૪૦/૧-૩૦॥

bhAgavatapurANa . adhyAya 10/40/1-30..

Proofread by PSA Easwaran

*Akrurakritam 4 Shri Krishna Stotram*

pdf was typeset on October 3, 2025

Please send corrections to *sanskrit@cheerful.com*